# Shri Bhuwaneshwari Mantra Garbha Sahasranamastotram

# શ્રીભુવનેશ્વરીમન્ત્રગર્ભનામસહસ્રકમ્

## Document Information

Text title : Bhuvaneshvari Mantra Garbha Sahasranama Stotra

File name : shrIbhuvaneshvarImantragarbhasahasranAma.itx

Category : sahasranAma, devii, dashamahAvidyA, stotra, devI, mantra

Location : doc_devii

Transliterated by : DPD

Proofread by : DPD

Latest update : April 5, 2013

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 11, 2023

*sanskritdocuments.org*

# શ્રીભુવનેશ્વરીમન્ત્રગર્ભનામસહસ્રકમ્

શ્રીભૈરવ ઉવાચ
દેવિ ! તુષ્ટોઽસ્મિ સેવાભિસ્તવદ્રૂપેણ ચ ભાષયા ।
મનોઽભિલષિતં કિઞ્ચિદ્ વરં વરય સુવ્રતે ॥ ૧॥

શ્રીદેવ્યુવાચ
તુષ્ટોઽસિ યદિ મે દેવ ! વરયોગ્યાઽસ્મ્યહં યદિ ।
વદ મે ભુવનેશ્વર્યાઃ મન્ત્રં નામસહસ્રકમ્ ॥ ૨॥

શ્રીભૈરવ ઉવાચ
તવ ભક્ત્યા બ્રવીમ્યદ્ય દેવ્યા નામસહસ્રકમ્ ।
મન્ત્રગર્ભં ચતુર્વર્ગફલદં મન્ત્રિણાં કલૌ ॥ ૩॥

ગોપનીયં સદા ભક્ત્યા સાધકૈશ્ચ સુસિદ્ધયે ।
સર્વરોગપ્રશમનં સર્વશત્રુભયાવહમ્ ॥ ૪॥

સર્વોત્પાતપ્રશમનં સર્વદારિદ્ર્યનાશનમ્ ।
યશસ્કરં શ્રીકરં ચ પુત્રપૌત્રવિવર્દ્ધનમ્ ।
દેવેશિ ! વેત્સિ ત્વદ્ ભક્ત્યા ગોપનીયં પ્રયત્નતઃ ॥ ૫॥

અસ્ય નામ્નાં સહસ્રસ્ય ઋષિઃ ભૈરવ ઉચ્યતે ।
પઙ્ક્તિશ્છન્દઃ સમાખ્યાતા દેવતા ભુવનેશ્વરી ॥ ૬॥

હ્રીં બીજં શ્રીં ચ શક્તિઃ સ્યાત્ ક્લીં કીલકમુદાહૃતમ્ ।
મનોઽભિલાષસિદ્ધ્યર્થં વિનિયોગઃ પ્રકીર્તિતઃ ॥ ૭॥

॥ ઋષ્યાદિન્યાસઃ ॥

શ્રીભૈરવઋષયે નમઃ શિરસિ । પઙ્ક્તિશ્છન્દસે નમઃ મુખે ।
શ્રીભુવનેશ્વરીદેવતાયૈ નમઃ હૃદિ । હ્રીં બીજાય નમઃ ગુહ્યે ।
શ્રીં શક્ત્યે નમઃ નાભૌ । ક્લીં કીલકાય નમઃ પાદયોઃ ।
મનોઽભિલાષયસિદ્ધ્યર્થે પાઠે વિનિયોગાય નમઃ સર્વાઙ્ગે ॥

ૐ હ્રીં શ્રીં જગદીશાની હ્રીં શ્રીં બીજા જગત્પ્રિયા।
ૐ શ્રીં જયપ્રદા ૐ હ્રીં જયા હ્રીં જયવર્દ્ધિની ॥ ૮॥

ૐ હ્રીં શ્રીં વાં જગન્માતા શ્રીં ક્લીં જગદ્વરપ્રદા ।
ૐ હ્રીં શ્રીં જૂં જટિની હ્રીં ક્લીં જયદા શ્રીં જગન્ધરા ॥ ૯॥

ૐ ક્લીં જ્યોતિષ્મતી ૐ જૂં જનની શ્રીં જરાતુરા।
ૐ સ્ત્રીં જૂં જગતી હ્રીં શ્રીં જપ્યા ૐ જગદાશ્રયા ॥ ૧૦॥

ૐ શ્રીં જૂં સઃ જગન્માતા ૐ જૂં જગત્ ક્ષયંકુરી ।
ૐ શ્રીં ક્લીં જાનકી સ્વાહા શ્રીં ક્લીં હ્રીં જાતરૂપિણી ॥ ૧૧॥

ૐ શ્રીં ક્લીં જાપ્યફલદા ૐ જૂં સઃ જનવલ્લભા ।
ૐ શ્રીં ક્લીં જનનીતિજ્ઞા ૐ શ્રીં જનત્રયેષ્ટદા ॥ ૧૨॥

ૐ ક્લીં કમલપત્રાક્ષી ૐ શ્રીં ક્લીં હ્રીં ચ કામિની ।
ૐ ગૂં ઘોરરવા ૐ શ્રીં ઘોરરૂપા હસૌઃ ગતિઃ ॥ ૧૩॥

ૐ ગં ગણેશ્વરી ૐ શ્રીં શિવવામાઙ્ગવાસિની ।
ૐ શ્રીં શિવેષ્ટદા સ્વાહા ૐ શ્રીં શીતાતપ્રિયા ॥ ૧૪॥

ૐ શ્રીં ગૂં ગણમાતા ચ ૐ શ્રીં ક્લીં ગુણરાગિણી ॥

ૐ શ્રીં ગણેશમાતા ચ ૐ શ્રીં શઙ્કરવલ્લભા ॥ ૧૫॥

ૐ શ્રીં ક્લીં શીતલાઙ્ગી શ્રીં શીતલા શ્રીં શિવેશ્વરી ।
ૐ શ્રીં ક્લીં ગ્લૌં ગજરાજસ્થા ૐ શ્રીં ગીં ગૌતમી તથા ॥ ૧૬॥

ૐ ઘાં ઘુરઘુરનાદા ચ ૐ ગીં ગીતપ્રિયા હસૌઃ ।
ૐ ઘાં ઘરિણી ઘટાન્તઃસ્થા ૐ ગીં ગન્ધર્વસેવિતા ॥૧૭॥

ૐ ગૌં શ્રીં ગોપતિ સ્વાહા ૐ ગીં ગૌં ગણપ્રિયા ।
ૐ ગીં ગોષ્ઠી હસૌઃ ગોપ્યા ૐ ગીં ધર્માઽમ્બુલોચના ॥ ૧૮॥

ૐ શ્રીં ગન્ત્રીં હસૌઃ ઘણ્ટા ૐ ઘં ઘણ્ટારવાકુલા ।
ૐ ઘ્રીં શ્રીં ઘોરરૂપા ચ ૐ ગીં શ્રીં ગરુડી હસૌઃ ॥ ૧૯॥

ૐ ગીં ગણયા હસૌઃ ગુર્વી ૐ શ્રીં ઘોરદ્યુતિસ્તથા ।
ૐ શ્રીં ગીં ગણગન્ધર્વસેવતાઙ્ગી ગરીયસી ॥ ૨૦॥

ૐ શ્રીં ગાથ હસૌઃ ગોપ્ત્રી ૐ ગીં ગણસેવિતા ॥

ૐ શ્રીં ગુણમતિ સ્વાહા શ્રીં ક્લીં ગૌરી હસૌઃ ગદા ॥ ૨૧॥

ૐ શ્રીં ગીં ગૌરરૂપા ચ ૐ ગીં ગૌરસ્વરા તથા ।
ૐ શ્રીં ગીં ક્લીં ગદાહસ્તા ૐ ગીં ગોન્દા હસૌઃ પયઃ ॥ ૨૨॥

ૐ શ્રીં ગીં ક્લીં ગમ્યરૂપા ચ ૐ અગમ્યા હસૌઃ વનમ્ ॥

ૐ શ્રીં ઘોરવદના ઘોરાકારા હસૌઃ પયઃ ॥ ૨૩॥

ૐ હ્રીં શ્રીં ક્લીં કોમલાઙ્ગી ચ ૐ ક્રીં કાલભયઙ્કરી ।
ઊ ક્રીં કર્પતહસ્તા ચ ક્રીં હૂં કાદમ્બરી હસૌઃ ॥ ૨૪॥

ક્રીં શ્રીં કનકવર્ણા ચ ૐ ક્રીં કનકભૂષણા ।
ૐ ક્રીં કાલી હસૌઃ કાન્તા ક્રીં હૂં કારુણ્યરૂપિણી ॥ ૨૫॥

ૐ ક્રીં શ્રીં કૂટપ્રિયા ક્રીં હૂં ત્રિકુતા ક્રીં કુલેશ્વરી ।
ૐ ક્રીં કમ્બલવસ્ત્રા ચ ક્રીં પીતામ્બરસેવિતા ॥ ૨૬॥

ક્રીં શ્રીં કુલ્યા હસૌઃ કીર્તિઃ ક્રીં શ્રીં ક્લીં ક્લેશહારિણી ।
ૐ ક્રીં કૂટાલયા ક્રીં હ્રીં કૂટકર્ત્રી હસૌઃ કુટીઃ ॥ ૨૭॥

ૐ શ્રીં ક્લીં કામકમલા ક્લીં શીં કમલા ક્રીં ચ કૌરવી ।
ૐ ક્લીં શ્રીં કુરુરવા હ્રીં શ્રીં હાટકેશ્વરપૂજિતા ॥ ૨૮॥

ૐ હ્રાં રાં રમ્યરૂપા ચ ૐ શ્રીં ક્લીં કાઞ્ચનાઙ્ગદા ।
ૐ ક્રીઈ શ્રીં કુણ્ડલી ક્રીં હૂં કારાબન્ધનમોક્ષદા ॥ ૨૯॥

ૐ ક્રીં કુર હસૌઃ ક્લઊ બ્લૂ ૐ ક્રીં કૌરવમર્દિની ।
ૐ શ્રીં કટુ હસૌઃ કુણ્ટી ૐ શ્રીં કુષ્ઠક્ષયઙ્કરી ॥ ૩૦॥

ૐ શ્રીં ચકોરકી કાન્તા ક્રીં શ્રીં કાપાલિની પરા ।
ૐ શ્રીં ક્લીં કાલિકા કામા ૐ શ્રીં હ્રીં ક્લીં કલઙ્કિતા॥ ૩૧॥

ક્રીં શ્રીં ક્લીં ક્રીં કઠોરાઙ્ગી ૐ શ્રીં કપટરૂપિણી ।
ૐ ક્રીં કામવતી ક્રીં શ્રીં કન્યા ક્રીં કાલિકા હસૌઃ ॥ ૩૨॥

ૐ શ્મશાનકાલિકા શ્રીં ક્લીં ૐ ક્રીં શ્રીં કુટિલાલકા ।
ૐ ક્રીં શ્રીં કુટિલભ્રૂશ્ચ ક્રીં હૂં કુટિલરૂપિણી ॥ ૩૩॥

ૐ ક્રીં કમલહસ્તા ચ ક્રીં કુણ્ટી ૐ ક્રીં કૌલિની ।

ૐ શ્રીં ક્લીં કણ્ઠમધ્યસ્થા ક્લીં કાન્તિસ્વરુપિણી ॥ ૩૪॥

ૐ ક્રીં કાર્તસ્વરૂપા ચ ૐ ક્રીં કાત્યાયની હસૌઃ ।
ૐ ક્રીં કલાવતી હસૌઃ કામ્યા ક્રીં કલાનિધીશેશ્વરી ॥ ૩૫॥

ૐ ક્રીં શ્રીં સર્વમધ્યસ્થા ૐ ક્રીં સર્વેશ્વરી પયઃ ।
ૐ ક્રીં હૂં ચક્રમધ્યસ્થા ૐ ક્રીં શ્રીં ચક્રરૂપિણી ॥ ૩૬॥

ૐ ક્રીં હૂઁ ચં ચકોરાક્ષી ૐ ચં ચન્દનશીતલા ।
ૐ ચં ચર્મામ્બરા હૂં ક્રીં ચારુહાસા હસૌઃ ચ્યુતા ॥ ૩૭॥

ૐ શ્રીં ચૌરપ્રિયા હૂઁ ચ ચાર્વઙ્ગી શ્રીં ચલાડચલા ।
ૐ શ્રીં હૂઁ કામરાજ્યેષ્ટા કુલિની ક્રીં હસૌઃ કુહૂ ॥ ૩૮॥

ૐ ક્રીં ક્રિયા કુલાચારા ક્રીં ક્રીં કમલવાસિની ।
ૐ ક્રીં હેલાઃ હસૌઃ લીલાઃ ૐ ક્રીં કાલવાસિની ॥ ૩૯॥

ૐ ક્રીં કાલપ્રિયા હૂં ક્રીં કાલરાત્રિ હસૌઃ બલા ।
ૐ ક્રીં શ્રીં શશિમધ્યસ્થા ક્રીં શ્રીં કન્દર્પલોચના ॥ ૪૦॥

ૐ ક્રીં શીતાઙ્શુમુકુટા ક્રીં શ્રીં સર્વવરપ્રદા ।
ૐ શ્રીં શ્યામ્બરા સ્વાહા ૐ શ્રીં શ્યામલરૂપિણી ॥ ૪૧॥

ૐ શ્રીં ક્રીં શ્રીં સતી સ્વાહા ૐ ક્રીં શ્રીધરસેવિતા ।
ૐ શ્રીં રૂક્ષા હસૌઃ રમ્ભા ૐ ક્રીં રસવર્તિપથા ॥ ૪૨॥

ૐ કુણ્ડગોલપ્રિયકરી હ્રીં શ્રીં ૐ ક્લીં કુરૂપિણી ।
ૐ શ્રીં સર્વા હસૌઃ તૃપ્તિઃ ૐ શ્રીં તારા હસૌઃ ત્રપા ॥ ૪૩॥

ૐ શ્રીં તારુણ્યરૂપા ચ ૐ ક્રીં ત્રિનયના પયઃ ।
ૐ શ્રીં તામ્બૂલરક્તાસ્યા ૐ ક્રીં ઉગ્રપ્રભા તથા ॥ ૪૪॥

ૐ શ્રીં ઉગ્રેશ્વરી સ્વાહા ૐ શ્રીં ઉગ્રરવાકુલા ।
ૐ ક્રીં ચ સર્વભૂષાઢ્યા ૐ શ્રીં ચમ્પકમાલિની ॥ ૪૫॥

ૐ શ્રીં ચમ્પકવલ્લી ચ ૐ શ્રીં ચ ચ્યુતાલયા ।
ૐ શ્રીં દ્યુતિમતિ સ્વાહા ૐ શ્રીં દેવપ્રસૂઃ પયઃ ॥ ૪૬॥

ૐ શ્રીં દૈત્યારિપૂજા ચ ૐ ક્રીં દૈત્યવિમર્દિની ।
ૐ શ્રીં દ્યુમણિનેત્રા ચ ૐ શ્રીં દમ્ભવિવર્જિતા ॥ ૪૭॥

ॐ શ્રીં દારિદ્ર્યરાશિઘ્ની ॐ શ્રીં દામોદરપ્રિયા ।
ॐ ક્લીં દર્પાપહા સ્વાહા ॐ ક્રીં કન્દર્પલાલસા ॥ ૪૮॥

ॐ ક્રીં કરીરવૃક્ષસ્થા ॐ ક્રીં હૂઁફ્કારિગામિની ।
ॐ ક્રીં શુકાત્મિકા સ્વાહા ॐ ક્રીં શુકકરા તથા ॥ ૪૯॥

ॐ શ્રીં શુકશ્રુતિઃ શ્રીં ક્લીં શ્રીં હ્રીં શુકકવિત્વદા ।
ॐ ક્રીં શુકપ્રસૂ સ્વાહા ॐ શ્રીં ક્રીં શવગામિની ॥ ૫૦॥

ॐ રક્તામ્બરા સ્વાહા ॐ ક્રીં પીતામ્બરાર્ચિતા ।
ॐ શ્રીં ક્રીં સ્મિતસંયુક્તા ॐ શ્રીં સૌઃ સ્મરા પુરા ॥ ૫૧॥

ॐ શ્રીં ક્રીં હૂઁ ચ સ્મેરાસ્યા ॐ શ્રીં સ્મરવિવદ્ધિની ।
ॐ શ્રી સર્પાકુલા સ્વાહા ॐ શ્રીં સર્વોપવેશિની ॥ ૫૨॥

ॐ ક્રીં સૌઃ સર્પકન્યા ચ ॐ ક્રીં સર્પાસનપ્રિયા ।
સૌઃ સૌઃ ક્લીં સર્વકુટિલા ॐ શ્રીં સુરસુરાર્ચિતા ॥ ૫૩॥

ॐ શ્રીં સુરારિમથિની ॐ શ્રીં સુરિજનપ્રિયા ।
ઐં સૌઃ સૂર્યેન્દુનયના ઐં ક્લીં સૂર્યાયુતપ્રભા ॥ ૫૪॥

ઐં શ્રીં ક્લીં સુરદેવ્યા ચ ॐ શ્રીં સર્વેશ્વરી તથા ।
ॐ શ્રીં ક્ષેમકરી સ્વાહા ॐ ક્રીં હૂઁ ભદ્રકાલિકા ॥ ૫૫॥

ॐ શ્રીં શ્યામા હસૌઃ સ્વાહા ॐ શ્રીં હ્રીં શર્વરીસ્વાહા ।
ॐ શ્રીં ક્લીં શર્વરી તથા ॐ શ્રીં ક્લીં શાન્તરૂપિણી ॥ ૫૬॥

ॐ ક્રીં શ્રીં શ્રીધરેશાની ॐ શ્રીં ક્લીં શાસિની તથા ।
ॐ ક્લીં શિતિર્હસૌઃ શૌરી ॐ શ્રીં ક્લીં શારદા તથા ॥ ૫૭॥

ॐ શ્રીં હ્રીં શારિકા સ્વાહા ॐ શ્રીં શાકમ્ભરી તથા ।
ॐ શ્રીં ક્લીં શિવરૂપા ચ ॐ શ્રીં ક્લીં કામચારિણી ॥ ૫૮॥

ॐ યં યજ્ઞેશ્વરી સ્વાહા ॐ શ્રીં યજ્ઞપ્રિયા સદા ।
ॐ ઐં ક્લીં યં યજ્ઞરૂપા ચ ॐ શ્રીં યં યજ્ઞદક્ષિણા ॥ ૫૯॥

ॐ શ્રીં યજ્ઞાર્ચિતા સ્વાહા ॐ યં યાજ્ઞિકપૂજિતા ।
શ્રીં હ્રીં યં યજમાનસ્ત્રી ॐ યજ્વા હસૌઃ વધૂઃ ॥ ૬૦॥

શ્રીં વાં બટુકપૂજિતા ॐ શ્રીં વરૂથિની સ્વાહા ॥

ૐ ક્ષ્રીં વાર્તા હસૌઃ ૐ શ્રીં વરદાયિની સ્વાહા ॥ ૬૧ ॥

ૐ શ્રીં ક્લીં ઐં ચ વારાહી ૐ શ્રીં ક્લીં વરવર્ણિની ।
ૐ ઐં સૌઃ વાર્તદા સ્વાહા ૐ શ્રીં વારાઙ્ગના તથા ॥ ૬૨ ॥

ૐ શ્રીં વૈકુણ્ઠપૂજા ચ વાં શ્રીં ઐં ક્લીં ચ વૈષ્ણવી ।
ૐ શ્રીં બ્રાં બ્રાહ્મણી સ્વાહા ૐ ક્ષ્રીં બ્રાહ્મણપૂજિતા ॥ ૬૩ ॥

ૐ શ્રીં ઐં ક્લીં ચ ઇન્દ્રાણી ૐ ક્લીં ઇન્દ્રપૂજિતા ।
ૐ શ્રીં ક્લીં ઐન્દ્રિ ઐં સ્વાહા ૐ શ્રીં ક્લીં ઇન્દુશેખરા ॥ ૬૪ ॥

ૐ ઐં ઇન્દ્રસમાનાભા ૐ ઐં ક્લીં ઇન્દ્રવલ્લભા ।
ૐ શ્રીં ઇડા હસૌઃ નાભિઃ ૐ શ્રીં ઈશ્વરપૂજિતા ॥ ૬૫ ॥

ૐ બ્રાં બ્રાહ્મી ક્લીં રું રુદ્રાણી ૐ ઐં દ્રીં શ્રીં રમા તથા ।
ૐ ઐં ક્લીં સ્થાણુપ્રિયા સ્વાહા ૐ ગીં પદક્ષયકરી ॥ ૬૬ ॥

ૐ ગીં ગીં શ્રીં ગુરસ્થા ચ ઐં ક્લીં ગુદવિવર્દ્ધિની ।
ૐ શ્રીં ક્ષ્રીં કૂં કુલીરસ્થા ૐ ક્ષ્રીં શ્રીં કૂર્મપૃષ્ઠગા ॥ ૬૭ ॥

ૐ શ્રીં ધૂં તોતલા સ્વાહા ૐ ત્રૌં ત્રિભુવનાર્ચિતા ।
ૐ પ્રીં પ્રીતિર્હસૌઃ પ્રીતાં પ્રીં પ્રભા પ્રીં પુરેશ્વરી ॥ ૬૮ ॥

ૐ પ્રીં પર્વતપુત્રી ચ ૐ પ્રીં પર્વતવાસિની ।
ૐ શ્રીં પ્રીતિપ્રદા સ્વાહા ૐ ઐં સત્ત્વગુણાશ્રિતા ॥ ૬૯ ॥

ૐ ક્લીં સત્યપ્રિયા સ્વાહા ઐં સૌં ક્લીં સત્યસઙ્ગરા ।
ૐ શ્રીં સનાતની સ્વાહા ૐ શ્રીં સાગરશાયિની ॥ ૭૦ ॥

ૐ ક્લીં ચં ચન્દ્રિકા ઐં સૌં ચન્દ્રમણ્ડલમધ્યગા ।
ૐ શ્રીં ચારુપ્રભા સ્વાહા ૐ ક્ષ્રીં પ્રેં પ્રેતશાયિની ॥ ૭૧ ॥

ૐ શ્રીં શ્રીં મથુરા ઐં ક્ષ્રીં કાશી શ્રીં શ્રીં મનોરમા ।
ૐ શ્રીં મન્ત્રમયી સ્વાહા ૐ ચં ચન્દ્રકશીતલા ॥ ૭૨ ॥

ૐ શ્રીં શાઙ્કરી સ્વાહા ૐ શ્રીં સર્વાઙ્ગવાસિની ।
ૐ શ્રીં સર્વપ્રિયા સ્વાહા ૐ શ્રીં ક્લીં સત્યભામિની ॥ ૭૩ ॥

ૐ ક્લીં સત્યાત્મિકા સ્વાહા ૐ ક્લીં ઐં સૌઃ ચ સાત્ત્વિકી ।
ૐ શ્રીં રાં રાજસી સ્વાહા ૐ ક્ષ્રીં રમ્ભોપમા તથા ॥ ૭૪ ॥

ૐ શ્રીં રાઘવસેવ્યા ચ ૐ શ્રીં રાવણઘાતિની ।
ૐ નિશુમ્ભોહન્ત્રી હ્રીં શ્રીં ક્લીં ૐ ક્રીં શુમ્ભમદાપહા ॥ ૭૫॥

ૐ શ્રીં રક્તપ્રિયા હરા ૐ શ્રીં ક્રીં રક્તબીજક્ષયઙ્કરી ।
ૐ શ્રીં માહિષપૃષ્ટસ્થા ૐ શ્રીં મહિષઘાતિની ॥ ૭૬॥

ૐ શ્રીં માહિષે સ્વાહા ૐ શ્રીં શ્રીં માનવેષ્ટદા ।
ૐ શ્રીં મતિપ્રદા સ્વાહા ૐ શ્રીં મનુમયી તથા ॥ ૭૭॥

ૐ શ્રીં મનોહરાઙ્ગી ચ ૐ શ્રીં માધવસેવિતા ।
ૐ શ્રીં માધવસ્તુત્યા ચ ૐ શ્રીં વન્દીસ્તુતા સદા ॥ ૭૮॥

ૐ શ્રીં માનપ્રદા સ્વાહા ૐ શ્રીં માન્યા હસૌઃ મતિઃ ।
ૐ શ્રીં શ્રીં ભામિની સ્વાહા ૐ શ્રીં માનક્ષયઙ્કરી ॥ ૭૯॥

ૐ શ્રીં માર્જારગમ્યા ચ ૐ શ્રીં શ્રીં મૃગલોચના ।
ૐ શ્રીં મરાલમતિઃ ૐ શ્રીં મુકુરા પ્રીં ચ પૂતના ॥ ૮૦॥

ૐ શ્રીં પરાપરા ચ ૐ શ્રીં પરિવારસમુદ્ભવા ।
ૐ શ્રીં પદ્મવરા ઐં સૌઃ પદ્મોદ્ભવક્ષયઙ્કરી ॥ ૮૧॥

ૐ પ્રીં પદ્મા હસૌઃ પુણ્યૈ ૐ પ્રીં પુરાઙ્ગના તથા ।
ૐ પ્રીં પયોદૃશદૃશી ૐ પ્રીં પરાવતેશ્વરી ॥ ૮૨॥

ૐ પયોધરનમ્રઙ્ગી ૐ ધ્રીં ધારાધરપ્રિયા ।
ૐ ધૃતિ ઐં દયા સ્વાહા ૐ ૐ શ્રીં ક્રીં શ્રીં દયાવતી ॥ ૮૩॥

ૐ શ્રીં દ્રુતગતિઃ સ્વાહા ૐ દ્રીં દ્રં વનઘાતિની ।
ૐ ચં ચર્મામ્બરેશાની ૐ ચં ચણ્ડાલરૂપિણી ॥ ૮૪॥

ૐ ચામુણ્ડાહસૌઃ ચણ્ડી ૐ ચં ક્રીં ચણ્ડિકાપયઃ ।
ૐ ક્રીં ચણ્ડપ્રભા સ્વાહા ૐ ચં ક્રીં ચારુહાસિની ॥ ૮૫॥

ૐ ક્રીં શ્રીં અચ્યુતેષ્ટા હ્રીં ચણ્ડમુણ્ડક્ષયકરી ।
ૐ ત્રીં શ્રીં ત્રિતયે સ્વાહા ૐ શ્રીં ત્રિપુરભૈરવી ॥ ૮૬॥

ૐ ઐં સૌઃ ત્રિપુરાનન્દા ૐ ઐં ત્રિપુરસૂદિના ।
ૐ ઐં ક્લીં સૌઃ ત્રિપુરધ્યક્ષા ઐં ત્રૌં શ્રીં ત્રિપુરાઽઽશ્રયા ॥ ૮૭॥

ૐ શ્રીં ત્રિનયને સ્વાહા ૐ શ્રીં તારા વરકુલા ।
ૐ શ્રીં તુમ્બુરુહસ્તા ચ ૐ શ્રીં મન્દભાષિણી ॥ ૮૮॥

ॐ શ્રીં મહેશ્વરી સ્વાહા ॐ શ્રીં મોદકભક્ષિણી ।
ॐ શ્રીં મન્દોદરી સ્વાહા ॐ શ્રીં મધુરભાષિણી ॥ ૮૯ ॥

ॐ મ્રીં શ્રીં મધુરલાપા ॐ શ્રીં મોહિતભાષિણી ।
ॐ શ્રીં માતામહી સ્વાહા ॐ માન્યા મ્રીં મદાલસા ॥ ૯૦ ॥

ॐ મ્રીં મદોદ્ધતા સ્વાહા ॐ મ્રીં મન્દિરવાસિની ।
ॐ શ્રીં ક્લીં ષોડશારસ્થા ॐ મ્રીં દ્વાદશરૂપિણી ॥ ૯૧ ॥

ॐ શ્રીં દ્વાદશપત્રસ્થા ॐ શ્રીં અં અષ્ટકોણગા ।
ॐ મ્રીં માતઙ્ગી હસૌઃ શ્રીં ક્લીં મત્તમાતઙ્ગગામિની ॥ ૯૨ ॥

ॐ મ્રીં માલાપહા સ્વાહા ॐ મ્રીં માતા હસૌઃ સુધા ।
ॐ શ્રીં સુધાકલા સ્વાહા ॐ શ્રીં મ્રીં માંસિની સ્વાહા ॥ ૯૩ ॥

ॐ મ્રીં માલા કરી તથા ॐ મ્રીં માલાભૂષિતા ।
ॐ મ્રીં માધ્વી રસાપૂર્ણા ॐ શ્રીં સૂર્યા હસૌઃ સતી ॥ ૯૪ ॥

ॐ ઐં સૌઃ ક્લીં સત્યરૂપા ॐ શ્રીં દીક્ષાહસૌઃ દરી ।
ॐ દ્રીં દાતૃપ્રિયા હ્રીં શ્રીં દક્ષયજ્ઞવિનાશિની ॥ ૯૫ ॥

ॐ દાતૃપ્રસૂ સ્વાહા ॐ શ્રીં દાતા હસૌઃ પયઃ
ॐ શ્રીં ઐં સૌઃ ચ સુમુખી ॐ ઐં સૌઃ સત્યવારુણી ॥ ૯૬ ॥

ॐ શ્રીં સાડમ્બરા સ્વાહા ॐ શ્રીં ઐં સૌઃ સદાગતિઃ ।
ॐ શ્રીં સીતા હસૌઃ સત્યા ॐ ઐં સન્તાનશાયિની ॥ ૯૭ ॥

ॐ ઐં સૌઃ સર્વદૃષ્ટિશ્ચ ॐ ક્રીં કલ્પાન્તકારિણી ।
ॐ શ્રીં ચન્દ્રકલ્લધરા ॐ ઐં શ્રીં પશુપાલિની ॥ ૯૮ ॥

ॐ શ્રીંશિશુપ્રિયા ઐં સૌઃ શિશૂત્સઙ્ગનિવેશિતા ।
ॐ ઐં સૌઃ તારિણી સ્વાહા ॐ ઐં ક્લીં તામસી તથા ॥ ૯૯ ॥

ॐ મ્રીં મોહાન્ધકારઘ્ની ॐ મ્રીં મત્તમનાસ્તથા ।
ॐ મ્રીં શ્રીં માનનીયા ચ ॐ પ્રીં પૂજાફલદા ॥ ૧૦૦ ॥

ॐ શ્રીં શ્રીં શ્રીફલા સ્વાહા ॐ શ્રીં ક્લીં સત્યરૂપિણી ।
ॐ શ્રીં નારાયણી સ્વાહા ॐ શ્રીં નૂપુરાકિલા ॥ ૧૦૧ ॥

ॐ મ્રીં શ્રીં નારસિંહી ચ ॐ મ્રીં નારાયાણપ્રિયા ।

ॐ મ્રીં હંસગતિઃ સ્વાહા ॐ શ્રીં હંસૌ હસૌઃ પયઃ ।૧૦૨॥

ॐ શ્રીં ક્રીં કરવાલેષ્ટા ॐ ક્રીં કોટરવાસિની ॥

ॐ ક્રીં કાઞ્ચનભૂષાઢ્યા ॐ ક્રીં શ્રીં કુરીપયઃ ॥ ૧૦૩॥

ॐ ક્રીં શશિરૂપા ચ શ્રીં સઃ સૂર્યરૂપિણી ।
ॐ શ્રીં વામપ્રિયા સ્વાહા ॐ વીં વરુણપૂજિતા ॥ ૧૦૪॥

ॐ વીં વટેશ્વરી સ્વાહા ॐ વીં વામનરૂપિણી ।
ॐ રં વ્રીં શ્રીં ખેચરી સ્વાહા ॐ રં વ્રીં શ્રીં સારરૂપિણી ॥ ૧૦૫॥

ॐ રં બ્રીં ખડ્ગધારિણી સ્વાહા ॐ રં બ્રીં ખપ્પરધારિણી ।
ॐ રં બ્રીં ખર્પરયાત્રા ચ ॐ પ્રીં પ્રેતાલયા તથા ॥ ૧૦૬॥

ॐ શ્રીં ક્લીં પ્રીં ચ દૂતાત્મા ॐ પ્રીં પુષ્પવર્દ્ધિની ।
ॐ શ્રીં શ્રીં સાન્તિદા સ્વાહા ॐ પ્રીં પાતાલચારિણી ॥ ૧૦૭॥

ॐ મ્રીં મૂકેશ્વરી સ્વાહા ॐ શ્રીં શ્રીં મન્ત્રસાગરા ।
ॐ શ્રીં ક્રીં ક્રયદા સ્વાહા ॐ ક્રીં વિક્રયકારિણી ॥ ૧૦૮॥

ॐ ક્રીં ક્રયાત્મિકા સ્વાહા ॐ ક્રીં શ્રીં ક્લીં કૃપાવતી ।
ॐ ક્રીં શ્રીં બ્રાં વિચિત્રાઙ્ગી ॐ શ્રીંક્લીં વીં વિભાવરી ॥ ૧૦૯॥

ॐ વીં શ્રીં વિભાવસુનેત્રા ॐ વીં શ્રીં વામકેશ્વરી ।
ॐ શ્રીં વસુપ્રદા સ્વાહા ॐ શ્રીં વૈશ્રવણાર્ચિતા ॥ ૧૧૦॥

ॐ ભૈં શ્રીં ભાગ્યદા સ્વાહા ॐ ભૈં ભૈં ભગમાલિની ।
ॐ ભૈં શ્રીં ભગોદરા સ્વાહા ॐ ભૈં ક્લીં વૈન્દવેશ્વરી ॥ ૧૧૧॥

ॐ ભૈં શ્રીં ભવમધ્યસ્થા ઐં ક્લીં ત્રિપુરસુન્દરી ।
ॐ શ્રીં ક્રીં ભીતિહર્ત્રી ચ ॐ ભૈં ભૂતભયઙ્કરી ॥ ૧૧૨॥

ॐ ભૈં ભયપ્રદા ભૈં શ્રીં ભગિની ભૈં ભયાપહા ।
ॐ હ્રીં શ્રીં ભોગદા સ્વાહા શ્રીં ક્લીં હ્રીં ભુવનેશ્વરી ॥ ૧૧૩॥

ઇતિ શ્રીદેવદેવેશિ ! નામ્ના સાહસ્રકોત્તમઃ ।
મન્ત્રગર્ભં પરં રમ્યં ગોપ્યં શ્રીદં શિવાત્મકમ્ ॥ ૧૧૪॥

માઙ્ગલ્યં ભદ્રદ સેવ્યં સર્વરોગક્ષયઙ્કરમ્ ।
સર્વદારિદ્યરાશિઘ્નં સર્વામરપ્રપૂજિતમ્ ॥ ૧૧૫॥

રહસ્યં સર્વદેવાનાં રહસ્યં સર્વદેહિનામ્ ।
દિવ્યં સ્તોત્રમિદં નામ્નાં સહસ્રમનુભિર્યુતમ્ ॥ ૧૧૬॥

પરાપરં મનુમયં પરાપરરહસ્યકમ્ ।
ઇદં નામ્નાં સહસ્રાખ્યં સ્તવં મન્ત્રમયં પરમ્ ॥ ૧૧૭॥

પઠનીયં સદા દેવિ ! શૂન્યાગારે ચતુષ્પથે ।
નિશીથે ચૈવ મધ્યાહ્ને લિખેદ્ યત્નેન દેશિકઃ ॥ ૧૧૮॥

ગન્ધૈશ્ચ કુસુમૈશ્ચૈવ કર્પૂરેણ ચ વાસિતૈઃ ।
કસ્તૂરીચન્દનૈર્દેવિ ! દૂર્વયા ચ મહેશ્વરી ! ॥ ૧૧૯॥

રજસ્વલાયા રક્તેન લિખેન્નામ્નાં સહસ્રકમ્ ।
લિખિત્વા ધારયેન્મૂર્ધ્નિ સાધકઃ સુભવાઞ્છકઃ ॥ ૧૨૦॥

યં યં કામયતે કામં તં તં પ્રાપ્નોતિ લીલયા ।
અપુત્રો લભતે પુત્રાન્ ધનાર્થી લભતે ધનમ્ ॥ ૧૨૧॥

કન્યાર્થી લભતે કન્યાં વિદ્યાર્થી શાસ્ત્રપારગઃ ।
વન્ધ્યા પુત્રયુતા દેવિ ! મૃતવત્સા તથૈવ ચ ॥ ૧૨૨॥

પુરુષો દક્ષિણે બાહૌ યોષિદ્ વામકરે તથા ।
ધૃત્વા નામ્નાં સહસ્રં તુ સર્વસિદ્ધિર્ભવેદ્ ધ્રુવમ્ ॥ ૧૨૩॥

નાત્ર સિદ્ધાદ્યપેક્ષાઽસ્તિ ન વા મિત્રારિદૂષણમ્ ।
સર્વસિદ્ધિકૃતં ચૈતત્ સર્વાભીષ્ટફલપ્રદમ્ ॥ ૧૨૪॥

મોહાન્ધકારાપહરં મહામન્ત્રમયં પરમ્ ।
ઇદં નામ્નાં સહસ્રં તુ પઠિત્વા ત્રિવિધં દિનમ્ ॥ ૧૨૫॥

રાત્રૌ વારત્રયં ચૈવ તથા માસત્રયં શિવે ! ।
બલિં દદ્યાદ્ યથાશક્ત્યા સાધકઃ સિદ્ધિવાઞ્છકઃ ॥ ૧૨૬॥

સર્વસિદ્ધિયુતો ભૂત્વા વિચરેદ્ ભૈરવો યથા।
પઞ્ચમ્યાં ચ નવમ્યાં ચ ચતુર્દશ્યાં વિશેષતઃ ॥ ૧૨૭॥

પઠિત્વા સાધકો દદ્યાદ્ બલિં મન્ત્રવિધાનવિત્ ।
કર્મણા મનસા વાચા સાધકો ભૈરવો ભવેત્ ॥ ૧૨૮॥

અસ્ય નામ્નાં સહસ્રસ્ય મહિમાનં સુરેશ્વરિ !।
વક્તું ન શક્યતે દેવિ ! કલ્પકોટિશતૈરપિ ॥ ૧૨૯॥

મારીભયે ચૌરભયે રણે રાજભયે તથા ।
અગ્નિજે વાયુજે ચૈવ તથા કાલભયે શિવે ! ॥ ૧૩૦ ॥

વનેઽરણ્યે શ્મશાને ચ મહોત્પાતે ચતુષ્પથે ।
દુર્ભિક્ષે ગ્રહપીડાયાં પઠેન્નામ્નાં સહસ્રકમ્ ॥ ૧૩૧ ॥

તત્ સદ્યઃ પ્રશમં યાતિ હિમવદ્ભાસ્કરોદયે ।
એકવારં પઠેત્ પાત્રઃ તસ્ય શત્રુર્ન જાયતે ॥ ૧૩૨ ॥

ત્રિવારં સુપઠેદ્ યસ્તુ સ તુ પૂજાફલં લભેત્ ।
દશાવર્તં પઠેત્ યસ્તુ દેવીદર્શનમાપ્નુયાત્ ॥ ૧૩૩ ॥

શતાવતં પઠેદ્ યસ્તુ સ સદ્યો ભૈરવોપમઃ ।
ઇદં રહસ્યં પરમં તવ પ્રીત્યા મયા સ્મૃતમ્ ॥ ૧૩૪ ॥

ગોપનીયં પ્રયત્નેન ચેત્યાજ્ઞા પરમેશ્વરિ ! ।
નાભક્તેભ્યસ્તુ દાતવ્યો ગોપનીયં મહેશ્વરિ ॥ ૧૩૫ ॥

॥ ઇતિ શ્રીભુવનેશ્વરીરહસ્યે શ્રીભુવનેશ્વરીમન્ત્રગર્ભસહસ્રનામકં
સમ્પૂર્ણમ્ ॥

Encoded and proofread by DPD

*Shri Bhuwaneshwari Mantra Garbha Sahasranamastotram*

pdf was typeset on March 11, 2023

Please send corrections to *sanskrit@cheerful.com*